# शास्त्रशिक्षणपद्धतयः नवाचाराश्च

## कार्यशालायाः द्वितीयं दिनम् (23-11-2023)




मणिरत्नमालायाः अध्ययनं पारायणं च बाल्ये गुरुमुखेन गुर्जरप्रान्ते लब्धजन्मना मया कृतम् । तदग्रे वाराणस्यां संस्कृतेन सह लौकिकविद्याः अधीताः। केवलम् एकस्मिन् शास्त्रे एकां पद्धतिम् आश्रित्य शोधकार्यकरणेन पूर्णता न भवति इति वरिष्ठानुभवैः ज्ञातम्। तत् सत्यमेव। सर्वाङ्गीणविकासाय सर्वाङ्गीणा सर्वकालोपयोगिनी च पद्धतिः आश्रयणीया। तदग्रे नवाचारः शक्यते। पञ्चाशत् वर्षेभ्यः पूर्वं नवाचारस्य प्रभावः नासीत्। कोषान् अवलोक्य महता परिश्रमेण वार्तां सज्जीकरोमि स्म। निमेषपञ्चकस्य वार्तां सज्जीकर्तुं घण्टात्रयं व्ययीकरोमि स्म। अद्य तन्त्रांशाः सन्ति। अतः सौकर्याणि सन्ति। परन्तु नवाचारेषु याः मितयः सन्ति ताः प्राचीनपद्धतिषु नैव आसन्। गुरुमुखेन प्राप्तां विद्यां विषाणुः (virus) न बाधते। परन्तु तन्त्रांशेषु सुखेन विषाणवः प्रविशन्ति। अतः शोधच्छात्राः नीरक्षीरविवेकशालिनः भवेयुः।

I do it I enjoy it इति भावः शोधच्छात्रेषु स्यात्।

**शास्त्रं सुनिश्चलधिया परिचिन्तनीयं**
**सेव्यो नृपोऽपि सततं परिसेवनीयः।**
**अङ्के स्थितापि युवतिः परिरक्षणीया**
**शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम् ॥**

इति प्राचीनं सुभाषितं बाल्ये श्रुतम्। एवमेव तुलसीदासेनापि उक्तम् -

**नानापुराणनिगमागमसम्मतं यद्**
**रामायणे निगदितं क्वचिदन्यतोऽपि।**
**स्वान्तःसुखाय तुलसीरघुनाथगाथा**
**भाषानिबन्धमतिमञ्जुलमातनोति।।**

एतत्सर्वम् आधुनिकयुगे आधुनिकैः विज्ञेयम्।





**डा. बलदेवानन्दसागरः**, राष्ट्रपतिपुरस्कृतः

शैक्षिकगुणोत्कर्षविषयिणी कार्यशाला (23-11-2023)

केन्द्रीयसंस्कृतविश्वविद्यालयः, मुख्यालयः , नवदेहली

# प्रातिभासिकं व्याख्यानम्

## व्याकरणशास्त्रे शोधकार्यस्य स्वरूपम् -



व्याकरणशास्त्रस्य इतिहासं सम्यक् ज्ञात्वा शोधकार्याणि कर्तव्यानि । शोधशीर्षकात् पादटिप्पणीं यावत् एकैकोऽपि बिन्दुः शोधकार्ये प्रधानः वर्तते। अतः आचार्यपरम्परामाश्रित्य विविधान् ग्रन्थान् अधीत्य च शोधकार्यं करणीयम् । सम्बद्धपत्रिकाणाम् अध्ययनं करणीयम् । अनुसन्धाने विधीनां उपकरणानां नवाचाराणां च अनुप्रयोगः तदैव शक्यते।

**डा। प्रमोदकुमारशुक्लवर्यः**

संयोजकः , शोधकेन्द्रम् , के.सं.वि . रणबीरपरिसरः , जम्मू

**प्रमाणामीमांसा –**



प्रमाणानि दर्शनानुगुणं भिद्यन्ते। सर्वदर्शनसमन्वितदृष्टिः अपेक्ष्यते। प्रमाणविषये कोलाहलः विवादः वा न कर्तव्यः। किञ्च

**शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः।**
**स एव सर्वशास्त्रज्ञः यस्य शान्तं मनः सदा॥**

इति शोधच्छात्रैः ज्ञेयम्। प्रमाणामीमांसा तदैव सफलं सम्भवति यदा धनात्मकं विश्लेषणं क्रियते। प्राच्यशोधकेन्द्रेषु विद्यमानाः दर्शनसम्बद्धमातृकाः शोधच्छात्रैः गवेषणीयाः।

मङ्गलं भवतु भवताम् ।

**आचार्यः आनन्दतीर्थ वि. नागसम्पिगे**

निदेशकः , पूर्णप्रज्ञशोधमन्दिरम् , आदर्शसंस्कृतशोधसंस्थानम्, बेङ्गळूरु

( के. सं.वि. दर्शनविषयकप्राक्शोधपाठ्यक्रमकेन्द्रम्)